मण्डलगह्वरे । सा कथञ्चिन्महीं गन्तुं नाशक्नोद्यत्नमास्थिता । नैव सा निर्गमं लेभे जटामण्डलमध्यतः । तत्रैवाबभ्रमद्देवी संवत्सरगणान् बहून् । तामपश्यन् पुनस्तत्र तपः परममास्थितः । स तेन तोषितश्चासीदत्यन्तं रघुनन्दन ! । विससर्ज ततो गङ्गां हरो विन्दुसरः प्रति । तस्यां विसृज्यमानायां सप्त स्रोतांसि जज्ञिरे ह्लादिनी पावनी चैव नलिनी च तथैव च । तिस्रः प्राचीं दिशं जग्मुर्गङ्गाः शिवजलाः शुभाः । सुचक्षुश्चैव सीता च सिन्धुश्चैव महानदी । तिस्रश्चैता दिशं जग्मुः प्रतीचीन्तु शुभोदकाः । सप्तमी चान्वगात्तासां भगीरथरथं तदा । भगीरथोऽपि राजर्षिर्दिव्यस्यन्दनमास्थितः । प्रायादग्रे महातेजा गङ्गा तं चाप्यनुव्रजत् ।” ४३ स० ।

“स गत्वा सागरं राजा गङ्गयानुगतस्तदा । प्रविवेश तलं भूमेर्यत्र ते भस्मसात्कृताः । भस्मन्यथाप्लुते राम ! गङ्गायाः सलिलेन वै । सर्व्वलोकप्रभुर्ब्रह्मा राजानमिदमब्रवीत् । तारिता नरशार्दूल ! दिवं याताश्च देववत् । षष्टिः पुत्राः सहस्राणि सगरस्य महात्मनः । सागरस्य जलं लोके यावत् स्थास्यति पार्थिव ! । सगरस्यात्मजाः सर्व्वे दिवि स्थास्यन्ति देववत् । इयञ्च दुहिता ज्येष्ठा तव गङ्गा भविष्यति । त्वत्कृतेन च नाम्नाथ लोके स्थास्यति विश्रुता । गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च । त्रीन् पथो भावयन्तीति तस्मात्त्रिपथगा स्मृता ।” ४४ स० ।

पुराणसर्वस्वे तु तस्या अवतरणप्रकारोऽन्यथा उक्तः कल्पभेदादविरोधः । यथा

महाभारते “महापुण्यां गगनतः पतन्तीं वै महेश्वरः ! दधार शिरसा गङ्गां तामेव दिवि सेवते” । ब्रह्माण्डे “महादेवस्य या शम्भोरुत्तमाङ्गोत्तमाच्छुभात् । विनिर्गता महानन्दा दक्षिणेक्षणतः शुभा” स्कान्दे “त्रिविक्रमपदोद्भिन्नब्रह्माण्डशुषिरोद्भवा । परा विष्णुपदीगङ्गा समुद्रापूर्त्तिकारिणी ।” वैष्णवे “ततः प्रभवति ब्रह्मन् ! सर्वपापहरा सरित् । गङ्गा देवाङ्गनाङ्गानामनुलेपनपिञ्जरा । विष्णुपादविनिष्क्रान्ता प्लावयित्वेन्दुमण्डलम् । समन्ताद्ब्रह्मणः पुर्य्यां गङ्गा पतति वै दिवः । सा तत्र पतिता दिक्षु चतुर्द्धा प्रत्यपद्यत । सीता चालकनन्दा च वङ्क्षुर्भद्रा च वै क्रमात् ।” पाद्मे “क्षितौ तारयते मर्त्यान्नागांस्तारयतेऽप्यधः । दिवि तारयते देवांस्तेन त्रिपथगा स्मृता ।” भविष्ये “महेश्वरस्य या शम्भोर्मूर्त्तिरेषा सनातनी । त्रैलक्यपावनार्थाय दृश्यया-धरणीकृता ।” तत्स्वभावप्रकरणं ब्रह्माण्डे “पापिष्ठानां पापहन्त्री स्वर्गमोक्षाप्तिहेतुका । स्वभाव एष गङ्गायाः शैत्यं शीतरुचो यथा” भविष्ये “पापखण्डनशीला हि सद्योगङ्गा स्वभावतः । उपपातकराशीनां सा हि हन्त्री यतः स्मृता” स्कान्दमात्स्ययोः “क्रोधलोभैकवृत्तीनां विपरीतक्रियावताम् । कामिनाञ्च तथान्यत्र तपोयज्ञादि निष्फलम् । गङ्गायान्तु कृतं सर्वं सफलं स्यान्न संशयः । परब्रह्मस्वरूपाया गङ्गायास्तु स्वभावतः” । सर्वदेवादिमयप्रकरणम् भविष्ये “शिववाक्यं “त्रैलोक्ये यानि तीर्थानि पुण्यान्यायतनानि च । पर्वतादीनि रम्याणि पुण्यक्षेत्राणि यानि च । धर्माश्च सर्वदेवाश्च सर्वयज्ञतपांसि च । अहं ब्रह्मा च विष्णुश्च सर्वशक्तिसमन्वितः । अष्टाविंशतिकोट्यस्तु देवता व्याप्य वै सदा । गङ्गायां सर्व एवैते सूक्ष्मरूपेण संस्थिताः । तिस्रः कोट्यर्द्धकोटी च तीर्थानां वायुरब्रवीत् । सर्वदा कलिकाले च गङ्गायां नात्र संशयः” भविष्ये “सर्वदेवमयी गङ्गा सर्ववेदस्वरूपिणी” भगवद्गीतायां “स्रोतसामस्मि जाह्नवीति” अथ तस्या विशिष्टताप्रकरणम् “देवानान्तु महादेवो यथा श्रेष्ठतमः स्मृतः । सर्वेषामेव तीर्थानां तथा गङ्गा विशिष्यते” महाभारते “सर्वतीर्थमयी गङ्गा सर्वधर्ममयो मनुः । सर्वशास्त्रमयी गीता सर्वदेवमयो-हरिः” स्कान्दे “भूतेश्वरादिह परोऽस्ति न पूजनीयो नैवाश्वमेधसदृशः क्रतुरस्ति लोके । गङ्गासमं त्रिभुवने न हि तीर्थमस्ति नान्यद्व्रतं च शिवरात्रिसमं तथास्ति” महाभारते “न गङ्गासदृशं तीर्थं न देवः केशवात् परः । ब्राह्मणेभ्यः परं नास्तीयेवमाह पितामहः” ब्रह्माण्डे “कलौ तु सर्वतीर्थानि स्वमहात्म्यप्रभावतः । गङ्गामभिमुखं यान्ति सा तु देवी न कुत्रचित्” नारदीये “कोटिष्वष्टासु दशसु तीर्थानां यत् फलं भवेत् । तत्सनस्तमिहैकत्र गङ्गायां लभते नरः” भविष्ये “अभिभूति प्रयाणेन भक्तिग्राह्या महेश्वरी । भावानुरूपफलदा गङ्गा सर्वजगद्धिता” ब्रह्माण्डे “प्रभासे गोसहस्रेण राहुग्रस्ते दिवाकरे । यत्फलं पाण्डवश्रेष्ठ ! गङ्गायां तद्दिने दिने । महापुण्या महावेगा सद्यः शुद्धिकरी परा । महापुण्यप्रदा सद्यः स्वर्गमोक्षप्रदैव सा” दानधर्मे “स्वायम्भुवं यथा स्थानं सर्वेषामुत्तमं स्मृतम् । तीर्थानां